# ॥ श्रीशिवाष्टोत्तरशतनामावलिः ॥

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥

ॐ अस्य श्रीशिवाष्टोत्तरशतनामस्तोत्रमन्त्रस्य नारायणऋषिः ।
अनुष्टुप्छन्दः । श्रीसदाशिवो देवता । गौरी उमा शक्तिः ।
श्रीसाम्बसदाशिवप्रीत्यर्थे जपे विनियोगः ॥

॥ अथ ध्यानम् ॥

शान्ताकारं शिखरिशयनं नीलकण्ठं सुरेशं
विश्वधारं स्फटिकसदृशं शुभ्रवर्णं शुभाङ्गम् ।
गौरीकान्तं त्रितयनयनं योगिभिर्ध्यानगम्यं
वन्दे शम्भुं भवभयहरं सर्वलोकैकनाथम् ॥

ॐ शिवाय नमः ।
ॐ महेश्वराय नमः ।
ॐ शम्भवे नमः ।
ॐ पिनाकिने नमः ।
ॐ शशिशेखराय नमः ।
ॐ वामदेवाय नमः ।
ॐ विरूपाक्षाय नमः ।
ॐ कपर्दिने नमः ।
ॐ नीललोहिताय नमः ।
ॐ शङ्कराय नमः । १०
ॐ शूलपाणिने नमः ।
ॐ खट्वाङ्गिने नमः ।
ॐ विष्णुवल्लभाय नमः ।
ॐ शिपिविष्टाय नमः ।
ॐ अम्बिकानाथाय नमः ।
ॐ श्रीकण्ठाय नमः ।
ॐ भक्तवत्सलाय नमः ।
ॐ भवाय नमः ।

ॐ शर्वाय नमः ।
ॐ त्रिलोकेशाय नमः । २०
ॐ शितिकण्ठाय नमः ।
ॐ शिवाप्रियाय नमः ।
ॐ उग्राय नमः ।
ॐ कपालिने नमः ।
ॐ कामारये नमः ।
ॐ अन्धकासुरसूदनाय नमः ।
ॐ गङ्गाधराय नमः ।
ॐ ललाटाक्षाय नमः ।
ॐ कलिकालाय नमः ।
ॐ कृपानिधये नमः । ३०
ॐ भीमाय नमः ।
ॐ परशुहस्ताय नमः ।
ॐ मृगपाणये नमः ।
ॐ जटाधराय नमः ।
ॐ कैलासवासिने नमः ।
ॐ कवचिने नमः ।
ॐ कठोराय नमः ।
ॐ त्रिपुरान्तकाय नमः ।
ॐ वृषाङ्काय नमः ।
ॐ वृषभारूढाय नमः । ४०
ॐ भस्मोद्धूलितविग्रहाय नमः ।
ॐ सामप्रियाय नमः ।
ॐ स्वरमयाय नमः ।
ॐ त्रयीमूर्तये नमः ।
ॐ अनीश्वराय नमः ।
ॐ सर्वज्ञाय नमः ।
ॐ परमात्मने नमः ।
ॐ सोमसूर्याग्निलोचनाय नमः ।
ॐ हविषे नमः ।

ॐ यज्ञमयाय नमः । ५०
ॐ सोमाय नमः ।
ॐ पञ्चवक्त्राय नमः ।
ॐ सदाशिवाय नमः ।
ॐ विश्वेश्वराय नमः ।
ॐ वीरभद्राय नमः ।
ॐ गणनाथाय नमः ।
ॐ प्रजापतये नमः ।
ॐ हिरण्यरेतसे नमः ।
ॐ दुर्धर्षाय नमः ।
ॐ गिरिशाय नमः । ६०
ॐ अनघाय नमः ।
ॐ भुजङ्गभूषणाय नमः ।
ॐ भर्गाय नमः ।
ॐ गिरिधन्वने नमः ।
ॐ गिरिप्रियाय नमः ।
ॐ कृत्तिवाससे नमः ।
ॐ पुरारातये नमः ।
ॐ भगवते नमः ।
ॐ प्रमथाधिपाय नमः ।
ॐ मृत्युञ्जयाय नमः । ७०
ॐ सूक्ष्मतनवे नमः ।
ॐ जगद्व्यापिने नमः ।
ॐ जगद्गुरुवे नमः ।
ॐ व्योमकेशाय नमः ।
ॐ महासेनजनकाय नमः ।
ॐ चारुविक्रमाय नमः ।
ॐ रुद्राय नमः ।
ॐ भूतपतये नमः ।
ॐ स्थाणवे नमः ।
ॐ अहिर्बुध्न्याय नमः । ८०

ॐ दिगम्बराय नमः ।
ॐ अष्टमूर्तये नमः ।
ॐ अनेकात्मने नमः ।
ॐ सात्त्विकाय नमः ।
ॐ शुद्धविग्रहाय नमः ।
ॐ शाश्वताय नमः ।
ॐ खण्डपरशवे नमः ।
ॐ रजसे नमः ।
ॐ पाशविमोचनाय नमः ।
ॐ मृडाय नमः । ९०
ॐ पशुपतये नमः ।
ॐ देवाय नमः ।
ॐ महादेवाय नमः ।
ॐ अव्ययाय नमः ।
ॐ हरये नमः ।
ॐ भगनेत्रभिदे नमः ।
ॐ अव्यक्ताय नमः ।
ॐ दक्षाध्वरहराय नमः ।
ॐ हराय नमः ।
ॐ पूषादन्तभिदे नमः । १००
ॐ अव्यग्राय नमः ।
ॐ सहस्राक्षाय नमः ।
ॐ सहस्रपदे नमः ।
ॐ अपवर्गप्रदाय नमः ।
ॐ अनन्ताय नमः ।
ॐ तारकाय नमः ।
ॐ परमेश्वराय नमः ।
ॐ त्रिलोचनाय नमः । १०८

॥ इति श्रीशिवाष्टोत्तरशतनामावलिः ॥